No. ४४०६

Title अनेक विध व्यवस्था प्रकार:

Author ×

Extent २१ Age ×

Subject धर्मशास्त्र

अनेकविषयव्यवस्थाप्रकारः

पप०६

५१ पत्रे

पण्डित रत्नजी शेव ...

अनेकविधव्यवस्थाप्रकारः

४४०६



॥श्रीसरस्वत्यैनमः॥ उक्तप्रकारकप्रश्ने श्रीसंकरादेव्याः पूजायांपूजकैस्समर्प्यमा
णंनिबंधत्वेन स्वयंग्राह्ययद्द्रव्यंतथा तत्पूजासेवतायतनेतथान्यदपिस्वार्जितं
द्रव्यंसुरियात्वमिश्वास्व ब्राह्मणेनलब्धुमिश्वायद्दिजायप्रदत्तं तद्दानंसिध्यत्येव॥
तच्चतस्यतदर्हंयियेनार्जितमितिस्वस्त्वास्पदीभूतस्यययेष्टविनियोगार्हतायाःनय
विविक्तग्रंथादावुक्तत्वात्। तथाभविष्यपुराणेपि। एवंसंमानयित्वातुमगान्शाकोमही
पते सम्महात्म[illegible]श्चंद्रभागासरित्तटे॥ पुरंनिवेशयामासस्थापयित्वादिवाकरं॥ तू
त्वाधनसमृद्धंतुभोजकायसमर्पयत्॥ इत्यादिनादेवतास्थानाधिकारदानस्यसूर्या

१

चमधिकृत्यस्पष्टमुक्तत्वात् ॥ मीठारामस्तु न तत्सुजादिद्रव्यात् किंचिदपिप्राप्तुमर्हति ॥
प्रापकतादृशवचनाभावादितिसर्वशास्त्रनिर्णयः ॥ मि॰ भादों शुदी १२ संवत् १९२२
पाठशालास्यपंडितप्रधानश्रीरामानंदपंडितानां निर्णयः ॥ अदेयं यश्च गृह्णाति
यश्चादेयं प्रयच्छति ॥ उभौ तौ चौरवच्छास्यौ दाप्यो चोत्तमसाहसं ॥ स्वंलभेता
न्यविक्रीतं क्रेतुर्दोषो प्रकाशिते ॥ हीनाद्रहो हीनमूल्ये वेलाहीने च तस्करः ॥ द्र
व्यमस्वामिविक्रीतं प्राप्य स्वामी तदाप्नुयात् प्रकाशं क्रयतः शुद्धिः क्रेतुस्तेयं र
हःक्रयात् ॥ हृतं प्रनष्टं यद्द्रव्यं परहस्तादवाप्नुयात् ॥ अनिवेद्य नृपे दण्ड्यः

सनुग्रस्सवातिपणान्॥ प्रमावबोधकत्वात्प्रमाणार्थं विविच्यतद्गुणरं।ति

ख्यते। कश्यत्नारव्यायस्कारेण स्य स्यचित्तेन स्ववस्तुजातस्य तत्त्रेणप्रति

बंधकस्यज्ञात्यनेकसमक्षेस्य गौलुप्युत्राय जंगलास्यायपत्सपत्रेग्रहं

दत्तंतद्दानं सिद्धमेव। ईशास्ते सदनस्य वै इति रत्नाकरादिधृतनारदव

चनात्। स्वंदद्यादिति मिताक्षराधृतवचनांतुरात्। स्वित्वास्वयमुपार्जि

र्थ इत्यादि स्मृतिदत्तत्वधृतविष्णुसूत्राच्च स्वसत्तास्पदीभूतस्य यथेष्टवि

नियोगार्हत्वसिद्धेः ताभ्यांयत्र पत्यं तं रतंतत्वास्याविरुद्धमितितन्मात्र

2

५

२

धनेपि तयोरनधिकारः तदीयज्ञातिव्यवहारस्तु नदुष्यति ॥ तदीयज्ञा
तौ अश्वोत्रकलथाव्यवहारस्य बहुधुप्रसिद्धे ॥ तथाचबृहस्पतिः ॥ देशजा
तिकुलानांचयेधर्मास्प्राक्प्रवर्तिताः ॥ तथैवतेमाननीयाप्रजाप्र [illegible] सेन्य
था ॥ उक्तप्रकारकप्रश्नेतदुत्तरं लिख्यते ॥ यत्किंचिद्वस्तुस्थावरंजंगमंवा
अनिश्चितस्वामित्वं विवादास्पदीभूतंतन्नविक्रेतव्यंयदिरागलोभादि
नाविक्रयोजातस्तदापरावर्तनीयंसविक्रयस्यजलसंभवतितथाच
कात्यायनः ॥ अस्वामिविक्रयंदानमाधिंचविनिवर्तयेत् ॥ नारदोपि ॥

स्तूम्य

अस्वामिविक्रयंदानमाधिंविनाकृतोपस्तुक्रयोविक्रयएवच।अदत्तःस
तुविज्ञेयोव्यवहारेषुनित्यशइति एतद्विशयेयद्व्येययीभूतेतद्वि
क्रेतृप्रतिनिधि आशारामहस्तात् गृहीता क्रयकर्तुर्देयं यदिप्रतिनिधि
गृहं किमपिनस्यात्तदायस्यप्रतिनिधितस्माद्धा पत्नी यं तयोर्जयपरा
जयविति।मिताक्षरोक्तन्यायात्।इतिव्यवस्थेयं शास्त्रसंमतेतिपाठशा
लास्यपंडितप्रधानश्रीरामानंदपंडितानांनिर्णयः॥पत्नीदुहितरश्चै
वपितरौभ्रातरस्तथेतिमिताक्षरावचनात्पतिपुत्रादिरहितायाःस्व

तायाब्राह्मण्याय द्रव्यं स्थावरं जंगमेवातत्तत्यतिभ्रातृगामिनस्तुलत्य
तिभागिनेयगामिनं वा तत्त्यति भागिनेयपुत्रगामीतिपाठशगत्रास्य पं
डितप्रधानरामानंदपंडितानां निर्णयः ॥ अपुत्रस्य मृतस्य धनं
पत्न्याद्यभावे य आसन्नतरः स तद्भागी ॥ तथाच व्यवहारमाधवे ।
बृहस्पतिः ॥ बहवो ज्ञातयो यत्र सकुल्या बांधवास्तथा । यस्त्वासन्नत
रस्तेषां सोनपत्यधनं हरेत् ॥ अर्घ्याक्षपातिक्रमकृत्ज्ञातिभार्या
पहारकः ॥ पंचाशत्पणिकोदंड एषामिति विनिश्चयः ॥ प्रोक्षप्रग

गत्यागतश्च किं विष्णुमेलइति मिताक्षरा विवादचिंतामणिः॥ ॥ऊ
क्तप्रकारकप्रश्ने ऽपरस्य विप्रस्य स्थावरादिधने भ्रातृजामातुर्नाधि
कारः। तत्प्रापकतादृशवचनाभावादिति व्यवस्थेयं पा॰ ॥
एवंभूते प्रश्ने नारदः। मृते भर्तर्यपुत्रायाः पतिपक्षः प्रभुस्त्रियाः। विनि
योगार्थरक्षासु भरणेषु स ईश्वरः। परिक्षीणे पतिकुले निर्मनुष्ये नि
राश्रये। तत्सपिंडेषु वा सत्सु पितृपक्षः प्रभुः स्त्रियाः॥ नारदः। भर्त्रा
प्रीतेन यद्दत्तं स्त्रियै तस्मिन्मृतेपि तत्। सा यथाकामं मश्नीयाद्दद्या

द्वास्या:वराहृतो।कात्यायनः॥भर्त्तृदायो मृते पत्यौ विन्यसेत्स्त्रीयथे
ष्टतः। विद्यमाने तु संरक्षेत् क्षपयेत्तत्कुलेऽन्यथा। उक्तप्रकारक
प्रश्ने तदुत्तरं लिख्यते। अस्वतंत्राः प्रजाः सर्वाः स्वतंत्रः पृथिवीपतिः॥
अस्वतंत्रः स्मृतः शिष्य आचार्ये तु स्वतंत्रता। एतान्येव प्रमाणानि भ
र्त्ता यद्यनुमन्यते। पुत्रः पत्युरभावे वा राजा वा पतिपुत्रयोरिति व्यवहारमा
धवधृतनारदवचनाभ्यां राजाधिकृतकाज्यारव्यादिमुद्राचिह्नितं स्वज्ञा
तिचिह्नरहितमपि पत्रं प्रमाणं भवत्येवेति॥ उक्तप्रकारकप्रश्ने तदुत्त
रं लिख्यते। पतिपुत्रादिहितायाः ब्राह्मणजात्यमिश्रिस्त्रियः। धनं तदभा

वेतदासमनमत्यनिग्रामपुत्रादिगामिनतमुत्रदुहितगामि॥ वहवोज्ञातयोम
त्रसकुल्याबोधवास्तथा। यस्त्वासन्नतरस्तेषां सोनपत्यधनं हरेदिति व्यव
हारमाधवादिधृतबृहस्पतिवचनात्॥ एवं भूतेप्रश्नेतदुत्तरं लिख्य
ते। राजवत्सपेक्षयाप्रजारतिर्भिन्नातथाचमिताक्षरायां। बृहस्पतिः।
अन्येग्रामेपुरग्रामेमहाजनविरोधकाः अनादेयास्तुतेसर्वे व्यवहारा
प्रकीर्तिताइति॥ उक्तप्रकारकप्रश्नेतदुत्तरं लिख्यते॥ गंगाकुरुक्षे
त्रादिपवित्रस्थाने यत्रकचनप्रदेशेवस्त्रादिस्थापयित्वातत्र चंस्नाना
दिनित्यनैमितिकविधिं कृत्वागमनसमयेस्वोपकारिणे स्वोपन्ना

५

ररहितायवायस्यैवस्मैचिद्विजाययद्धन्तरकुकादियोऽदीयतेतद्दानमेव
नतुदानातिरिक्तम्इत्यादिरूपा यत्एषमूल्यमितिमिताक्षराद्विध्वनार
दवचनात्॥दातव्यमितियद्दानंदीयतेऽनुपकारिणे।देशेकालेच
पात्रेच तद्दानंसात्विकंस्मृतंइत्यादिमहाभारतांतर्गतभगवद्गी
तावचनाच्च।व्याख्यातंचैवमेवगीताव्याख्यानेश्रीधरस्वामिनाइति·
स्वद्यात्ईशास्तेस्वधनस्यवैइतिवचनाभ्यांयथेष्टविनियोगार्हत्वप्रतिपाद
काभ्यांदानसिद्धेःसंसत्त्वश्चायमर्थः। स्वर्यातस्यह्यपुत्रस्यधनंस्थावरजंगमं

6

वापत्नीसंयत्नाग्रहाति न तु तत्सत्वेव दौहित्रः ॥ असुतस्य प्रमीतस्य पत्नी तद्भा
गहारिणीति बृहस्पतिवचनात् पत्नी भर्तुर्धनहरी या स्यादव्यभीचारिणीति ॥ का
त्यायनवचनात् ॥ पत्नी दुहितरश्चैवेति याज्ञवल्क्यवचनात् ॥ ० बृहस्पतिः ॥ बृह
वोज्ञातयो यत्र सकुल्या बांधवास्तथा ॥ यस्त्वासन्नतरस्तेषां सोनपत्यधनं हरेत्
रेत् ॥ ० मृते भर्तरि भर्त्रंशं लभेत कुलपालिका ॥ यावज्जीवं न हि स्वाम्यं दाना
धमनविक्रये ॥ धा दाने वा धमने वा पि धर्म्मार्थे वा विशेषतः ॥ आदाने वा विस
र्गे वा न स्त्री स्वातंत्र्यमर्हति स्थावरादतद इत्यादि ऋषिवचनैः स्वपतिभ्रातृपु
त्रसत्वे तदनुमतिं विना पतिपुत्रादिरहितानां स्त्रीणां यस्य कस्यचिदुदासीनस्य

स्थावरदानेनाधिकार इति॥ ० श्रीमद्गिरिजापुरस्य धर्माधिकारणीय श्रीम
द्राजपुरुषप्रेषितपत्रकदंबमवधायतदुत्तरं लिख्यते॥ निर्वाणभक्तेन स्वस्य
चित्तेन स्ववस्तुजालस्वतंत्रेण फलेचं द्वारभ्यायससाक्षिकलिखानामारभ्य पत्र
द्वारायद्दत्तं प्रतिश्रुतं वातन्निधनोत्तरं तद्भार्ययापि ससाक्षिकपत्रेण तथैवानु
मोदितं तत्तथैव तदीयैः पालनीयं॥ ततः किंचिदुद्धृत्यान्यस्मै तद्भार्यति दातुं
न शक्नोति यच्चान्यस्मै प्रतिश्रुतं देयं प्रतिश्रुतं चैव दत्वा नापहरेत्पुनरिति मिता
क्षराधृतयाज्ञवल्कीयपद्यावयवाभ्यां प्रतिश्रुतादेरपहाराभावात्। सकृद्दानं

ददातीति त्रीण्येतानि सकृत्सकृदिति व्यवहारमाधवीय बृहस्पतिवचनस्यैदे
न सकृद्दत्तेसत्वाभावेन पुनर्दानासंभवात्॥ फतेचंद्रनिधनोत्तरमविभक्तपु
त्रत्वेन तत्सुतेकृष्णभागित्वेन मितिकात्यायनवचनेन संप्रत्यालमचंद्रा
दय एव तदीयदायाधिकारिण इति॥ ० ॥ कालिकापुराणे॥ स्वगात्ररुधिरं
दत्वा ब्रह्महत्यामवाप्नुयात्॥ मद्यं दत्वा ब्राह्मणस्तु ब्राह्मण्यादेव हीयते॥ इ
ति वचनाद्ब्राह्मणातिरिक्तस्य सकामस्य सर्वस्य स्वगात्रच्छेदनादिकमभ्यनुज्ञा
यते॥ सितासितसंगमे स्वस्य स्वव्याध्याद्युपद्रुतस्य वृद्धपित्रादिरहितस्य वा
तनुत्यागविधिः कथ्यते॥ तथा च पद्मपुराणे विष्णुः देहत्यागे तपावीराः कुर्व

७

तिममसंनिधौ। मत्तनुप्रविशंत्येवन पुनर्जन्मतेनराः॥१॥ कौर्मे॥ व्यापितो। यदिवादीनः [illegible] वापिभवेन्नरः॥ गंगायमुनमासाद्ययस्तुप्राणान्परित्यजेत्। दीप्तकांचनवर्णाभैर्विमानैर्भानुवर्णिभिः। गंधर्वाप्सरसांमध्येस्वर्गेमोदतिमानवः। ईप्सितांल्लभतेकामान्वदंतिमुनिपुंगवाः। सर्वरत्नमयैर्दिव्यैर्नानाभोगसमाकुलैः॥ वरांगनासमाकीर्णैः। मोदतेशुभलक्षणाः। गीतवादित्रनिर्घोषैःप्रसुप्तमानिबोधयैत्॥ बुध्यते॥ यावन्नलभतेजन्मतावत्स्वर्गमहीयते॥ तस्मात्स्वर्गात्परिभ्रष्टःक्षीणकर्मायथ [illegible]॥ हिरण्यसत्वसंपन्नःसमृद्धोजायतेकुले॥ तथावटमूलंसमाश्रित्ययस्तुप्राणान्परित्यजेत्॥

सर्वलोकमतिक्रम्य इंद्रलोके सगदति ॥ तथा ॥ यागतियोगयुक्तस्य सत्वस्थस्य
मनीषिणः सा गतिस्त्यजतः प्राणान् गंगायमुनसंगमे । तथा । गंगायमुनयो
र्मध्ये कर्षाग्निं यस्तु साधयेत् । अहीनांगो ह्यरोगश्च पंचेंद्रियसमन्वितः ॥ याव
न्ति रोमकूपाणि तस्य गात्रे भुमान्नरा । तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥
ततः स्वर्गात्परिभ्रष्टो जंबूद्वीपपतिर्भवेत् ॥ स भुक्त्वा सकलान् भोगान् सत्तीर्थे स
मतेन्नरः । जलप्रवेशं यः कुर्यात्संगमे लोकविश्रुते ॥ राहुग्रस्तो यथा सोमो विमुक्तः
सर्वपातकैः ॥ सोमलोकमवाप्नोति सोमेन सह मोदते ॥ षष्टिवर्षसहस्राणि षष्टि
वर्षशतानि च ॥ स्वर्गतः सर्वलोकेषु मुनिगंधर्वसेवितः । तथा हेमाद्रिपुराणे ॥ ८

8

गच्छेन्महापथं वापि तुषारगिरिमादरात्॥ उत्तमान्प्राप्नुयाल्लोकान्नात्मघाती भवेत्क्वचित्॥ शालग्रामस्याप्यनुज्ञाते तीर्थे प्राणविमोक्षणं॥ श्रीशिवरहस्ये मणिकर्णिकामहात्म्ये॥ यस्त्वत्र शैव पुण्यात्मा तनुत्यागं करिष्यति॥ कालेन वा वत्स ह्यपि हलमशनादिना यथा वा। कालेन व्याभाविकेन बलाद्धत्या कारणशस्त्रघातविषभक्षणादिना वा। आदिनेति॥ जलप्रवेशाग्निप्रवेशादयः॥ तेरात्मघातदोषो नास्तीति यावत्॥ वृद्धो च पिलसीलरता भार्यापोष्याप त्यंचविहाय न कस्याप्यधिकारो बलात्प्राणत्यागे॥ तथा च मनुः॥ वृद्धो च माता पितरौ साध्वी भार्या सुतः

शिषुः॥ अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीत्॥ नारी भर्त्तारमासाद्य
कुणपं दहते यदा अग्निर्दहति गात्राणि आत्मानं नैव पीडयेत्॥ व्यालग्राहीय
था व्यालं बिलादुद्धरते बलात्॥ पतितं नरके घोरे उद्धरेत्सहगामिनी॥ दिव्यवर्ष
प्रमाणेन तिस्रकोट्योऽर्द्धकोटयः॥ तावत्कालं वसेत्स्वर्गे भर्तारं यानुगच्छति॥
तदंते च्यवते लोके कुले भवति धीमतां॥ महाप्रीतिमवाप्नोति सप्तजन्मस्वगेश्व
र॥ सिंहव्याघ्रनरं वापि स्वगात्ररूपिरं तथा॥ न दद्याद्ब्राह्मणे मद्यं तथा देवे
कदाचन॥ सिंहव्याघ्रनरान् दत्वा ब्राह्मणो नरकं व्रजेत्॥ हतापि स्यात्स्वहीनायुः सुख
सौभाग्यवर्जितः इत्यादि निषेधे न तदतिरिक्तस्याभ्यनुज्ञापनं इति सिद्धांतः॥०॥

९ ६

यो

एवंभूतेप्रश्नेमिताक्षरायांयाज्ञवल्क्यः। पत्नीदुहितरश्चैवपितरौभ्रातरस्तथा। तत्सुता
गोत्रजाबंधुःशिष्यसब्रह्मचारिणः॥ रामकृष्णस्यपरामर्शः॥ कस्यचिन्मूलपुरुषस्यद्वे
जाययोर्ज्येष्ठादुहितृवती आसीत्॥ कनिष्ठाचानपत्या॥ तेचदुहितरावपुत्रेणमूल
पुरुषेणपुत्रिकाकृतेसमजायेतां॥ ततोज्येष्ठामूलपुरुषस्यव्यरसीत्॥ ततकनिष्ठाए
कस्मैमूलपुरुषदौहित्रायसस्थावरंमूलपुरुषधनंप्रीत्यासर्वंसमर्पयत्॥ तत्रापरो
दौहित्रःसंप्रदानदौहित्रेणविवदते॥ आवयोःपुत्रिकापुत्रयोःसतोर्मातामहीन
स्वामिनीअस्वामिनाचदत्तमितितसर्वंधनंत्वमेवार्हसिकिंत्वहमप्यर्हमितितत्र
पुत्रिकापुत्रस्त्वेमातामह्याःस्वत्वमास्तिनवेतिविपश्चितप्रतिप्रश्नः॥ तत्रेदंविप

10

श्चितामुत्तरं॥ पुत्रिकापुत्रसत्वेन मातामहस्याप्यधिकारो धने॥ द्वादशपुत्राभावे एव प
त्नीदुहितरश्चैवेति पत्न्यधिकार स्पष्टं याज्ञवल्क्येनोक्तत्वात्॥ अकृता वा कृता वा
पि यं विंदेत्सदृशात्सुतं॥ पौत्री मातामहस्तेन दद्यात्पिंडं हरेद्धनमिति मनूक्तेश्च॥ त
तुल्यः पुत्रिकापुत्रो दायादः सोथ वा भवेत्॥ पितुर्मातामहश्चापि निरपुत्रस्य पुत्रवदिति
देवलोक्तेश्च॥ तत्सम: पुत्रिकापुत्र इति याज्ञवल्क्योक्तेश्च॥ तत्सम औरससम इति
तदर्थः॥ शंखलिखितावप्याहतुः॥ स्त्रीधनं कन्यका लभंते तदपत्यस्य चद्रव्य कर्न्यभा
गएवेति सैवापसंयस्यत्यर्थः॥ बोधायनोपि॥ औरसं पुत्रिकापुत्रं क्षेत्रजं दत्तकृत्रिमौ
गूढं चैवापविद्धं च रिक्थभागः प्रचक्षते इत्याह तस्मात्पुत्रिकापुत्रस्तेन मातामहस्याः न
तदपत्यस्येवेति २ कप

स्वल्पमिति दिक्॥ श्रीमद्धर्माधिकरणागतगुमानिरामकाशीनाथकाशीवाद्यादिप्रति
वादिविवादसंसृष्टपत्रोत्तरात्तत्तदर्थं ज्ञात्वा तत्तद्धर्माधिकरणपण्डितैः सहविचारं कृत्वा त
दुत्तरं लिख्यते॥ कस्यचिन्मूलपुरुषस्य द्वयोर्भार्ययोर्ज्येष्ठा दुहितृद्वयवती कनिष्ठा च
नपत्या ततो ज्येष्ठापत्नी मूलपुरुषस्य परं सा तदा ततः कनिष्ठा ज्येष्ठपत्नीदुहित्रादि समवा
ये मूलपुरुषस्थावरजंगमधनाधिकारी क इति प्रश्नः॥ तत्रेदमुत्तरं॥ दुहितृद्वयस
त्वेपि स्त्रिया एव पतिधने पूर्वमधिकारः। जीवत्यर्द्धशरीरेऽर्थे कथमन्यः समाप्नुयात्॥
अपुत्रस्य प्रमीतस्य पत्नी तद्भागहारिणीति दायभागधृत बृहस्पतिवचनात्॥
पत्नी दुहितरश्चेत्यादि मिताक्षराधृत याज्ञवल्क्यवचनाच्च॥ तदनंतरमेव कस्यै मूल

वंधक

पूरुषैर्हि त्रायसस्थावरं मन्त्र पुरुषदायागतं धनं प्रीत्यालयादत्तं तदपिशा
स्त्रसिद्धमेव ईशास्तिस्वधनस्यैवेत्यादिरत्नाकरधृतासंख्यवचनात् । यद्यपिस्त्री
णां भर्त्रा दत्तस्थावरविनियोगेनाऽधिकारस्तथापि दायप्राप्तेऽधिकारोस्त्येव यथैषां
स्थावरेष्वपीत्युक्तेः ॥ प्रतिपिंडकसपिंडाद्यभावेतु सुतरामधिकारः ॥ यत्तु मूलपुरु
षेणोभयोः पुत्रिकाकरणं कृतमिति तन्मातामहस्य धनाधिकार इत्यनधिकृतस्या
प्यपंडितेनोक्तं तच्चिंत्यं उभयोः पुत्रिकरणस्य शास्त्रेऽनुक्तत्वात् ॥ कन्नौदत्तौरसे
तरेषां पुत्रत्वेन निषेधाच्च ॥ तथाच नारदः ॥ दत्तौरसेतरेषांतु पुत्रत्वेन परिग्रहः ॥

11

महाप्रस्थानगमनं गोमेधश्च तथा मखः ॥ इमान्धर्मान्कलियुगे वर्ज्यानाहुर्मनी

रसे

११

षिणः। तथा याज्ञवल्क्यटीकायां चन्द्रस्मृतिः॥ कल्लाविलमधिकृत्य॥ अनेकधा कृता पुत्रा

ऋषिभिर्ये पुरातनैः॥ न शक्यास्ते ऽधुना कर्तुं शक्तिहीनैरिदंतनैरिति॥ किं बहुना॥

एतद्विषये पुत्रिकरणस्यैवाजातत्वेनैव निर्णीतत्वाच्चेति॥ तत्र द्वाजन्मस्थानाधि

कृतपर्यालिंतत्र यपरामर्षइतिसुधियाविभावयंत्वितिसंमत्तोयमर्थः॥ ॰

उक्तप्रकारकप्रश्नेतदुत्तरं लिख्यते। पितृनिधनोत्तरं बहूनां भ्रातॄणां पि

त्रर्जितधनविभागकृते ततो धर्मकृत्यार्थं प्रत्यक्षावशेशितधने यदि

द्वयोपुत्रयोः पितृमुदयार्थं वापिकूपतडागादिकरणे प्रवर्तितत्रान्यैरपि

त्पेवानुमोदनं कर्त्तव्यं ॥ तथा च कर्मविपाके शातातपः ॥ वापिकूपत

डागादिकरणे विघ्नजेध्यने ॥ निवारयति पापात्मा तिर्यग्योनिं प्रयाति

स ॥ इतिदानधर्मे श्री मन्महाभारते एवमेवोक्तं ॥ ० व्यवहारमाधवी

रमित्रोदयपर्योर्बृहस्पतिः ॥ सन्नोद्वाहोद्यतो रोगी शोकार्त्तोमत्तबालकः ॥ स

न्नावस्कोभियुक्तश्च नृपकार्योद्यतो व्रती ॥ आसन्नसंनिकृः संस्थे कर्षक

श्च पसंग्रहे ॥ विशमस्थाश्च नासेद्धव्यो सनाधा तत्त्वे वृ चेति वचनेरु

द्वाहादि विघ्नोत्पादकरणमनुचितमिति ॥ ० उक्तं च गीतामहात्म्ये ॥ यतीन्स

प्या

12

१२

पूज्यविप्रविवत्पादौमूर्ध्नि प्रगृह्य च॥ यः पठेद्विश्वरूपाख्यं यतीनां पुरतः स्थितः।
यथा लोके यतिं स्पृष्ट्वा दृष्ट्वा चैव न मनश्शुचिः॥ शास्त्रमध्ये तथा गीतो स्पृष्ट्वा दृष्ट्वा
न मनश्शुचिः॥ स्मृत्यंतरे॥ दर्शनात्स्पर्शनाच्चैव भाषणादर्चनाद्यतेस्त
त्क्षणादेव पूतः स्यात्काश्यां गंगोदके यथा॥ ब्रह्माजन्मखंडेऽपि॥ सन्यासिन
श्च स्पर्शनान्निष्पापो जायते नरः॥ दृष्ट्वा च कामतो नत्वा राजसूयफलं ल
भेत्॥ आचाररत्ने छागलेयः॥ यतीनां दर्शनं चैव स्पर्शनं भाषणं तथा॥
कुर्वाणः पूयते नित्यं तस्मात्पश्येत्तु नित्यशः॥ नवमस्कंधे गंगां प्रति भागी॥

रथवचनं॥साधवोन्यासिनःशांताः अग्निष्ठालोकपावनाः॥हरंत्यघंत्वंगसं
गान्नैयोस्त्वेवघभिन्नित्सरि॥प्रपंचसारे॥ वहवस्मृतिकर्तारो वेदाध्यापिम
तानिच॥तथापिपंथाविज्ञेयो योनशिष्टैर्विगर्हितः॥यद्यपिस्यात्स्वयं
ब्रह्मात्रैलोक्याकर्षणःक्षमः॥तथापिलौकिकाचारंमनसापिनलंघ
येत्॥मिताक्षरायांयाज्ञवल्क्यः॥कर्मणामनसावाचा वलाद्धर्मंसमा
चरेत्॥अस्वर्ग्यंलोकविद्विष्टंधर्ममप्याचरेन्नतु॥इत्यादिवचनैर्य
तीनांस्पर्शपुण्यातिशयइति॥०॥विभक्तस्यस्वयतिस्यब्रह्मपुत्रस्यधनं

पत्नीगृह्णातिनमात्रादयःपत्नीदुहितरश्चेत्यादि॥मिताक्षरास्ययाज्ञव
ल्क्यः॥अपुत्रस्यप्रमीतस्यपत्नीतद्भागहारिणीतिबृहस्पतिवचनाच्चेति॥०॥
उक्तप्रकारकप्रश्नेचतुर्वर्गचिंतामणिस्ययाज्ञवल्क्यभविष्यपुराणस्यव्यासव
चनाभ्यामुत्तरमाह॥पूर्वाह्णिकास्तुतिथयोदेवकार्येफलप्रदाः॥अपराह्णिका
स्तुविज्ञेयाःपित्र्यर्थेतुशुभावहाः॥व्रतोपवासनियमेघटिकैकायदाभवेत्॥
सातिथिःसकलाज्ञेयापित्र्यर्थेचापराह्णिकी॥निष्कर्षश्चायं॥०॥मिताक्षरायांका
त्यायनः॥विवाहात्परतोयत्तुलब्धंभर्तृकुलात्स्त्रियः॥अन्वाधेयंतदुक्तंचल

ध्यंवंधुमुक्ता स्त्रियैत्तथा ॥ ० ॥ मिताक्षरायां नारदः ॥ भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन्मृते पि तत् । सा यथा काममश्नीयाद्दद्याद्वा स्थावरादृते ॥ मिताक्षरायां कात्यायनः । न च भर्त्ता न च सुतो न पिता भ्रातरो न च ॥ आदाने वा विसर्गे वा स्त्रीधनं प्रभविष्णवः ॥ यदि ह्येकतरो ह्येषां स्त्रीधनं भक्षयेद्बलात् ॥ सवृद्धि प्रतिदाप्यः स्याद्दण्डं चैव समाप्नुयात् ॥ ० पूर्वोक्तप्रश्नस्यैव मुक्तिकन्यायेन मिताक्षरायस्य मुत्तरमाह ॥ स्थावरं द्विपदं चैव यद्यपि स्वयमर्जितं ॥ असंभूय सुतान्सर्वान्न दानं न च विक्रयः ॥ सोदाय्ये वे स्थावरे स्यातं त्र्यकथनेन न तद्दत्ति रिक्ते स्त्रीणां स्यात् इत्याद्येति तत्वं ॥ ० ॥ उक्तप्रकारकप्रश्ने मिताक्षरास्य मा

14

ज्ञवल्क्यवचनेनतदुत्तरं दर्शयति॥ वानप्रस्थयतिब्रह्मचारिणाम्रक्थभागि
नः॥ क्रमेणाचार्यसच्छिष्यधर्मभ्रात्रेकतीर्थिनः॥ संमतोयमर्थः॥ ०॥
उक्तप्रकारकप्रश्नेतदुत्तरं लिख्यते॥ यदिसीतारामःस्वभगिनीपुत्रेभ्यो मयारामा
दिभ्यःस्वर्त्तिदत्वामृतस्तदालब्धानेक्षिप्रमेव॥ स्वभागान्यदिदद्युरितिन्यायात्॥
यदातद्दानेसंदेहाभावोतदातन्मरणोत्तरंतत्पत्न्यासहजयातत्स्वर्गार्थिस्व
भगिनीपुत्रदुहित्रेमस्वनास्येयदत्तंतदप्रतिबन्धकमयारामादिसतेपिसि
धत्येवस्पष्टीकृतंचदायविभागेतदाह॥ व्यासः॥ मृतेभर्तरित्यारभ्यदानानि
विप्रमुख्येभ्योदद्यात्पुण्यविवृद्धये॥ इत्येतदंतेन॥ तत्रैवस्थलांतरेतथादानध

र्स्त्रीणां स्वपतीत्यारभ्य यदा नाहि वमप्यनुमतमित्यंतेन च॥ संमतोयमर्थः॥ ॥
पारसीकलिखितव्याख्यानेशास्त्रार्थे संमतिवाक्यानि॥ श्रीमत्कुलस्त्वं भभेदेत त्रयावसहो
निषेकाभावस्त्वावत्तदीययात्राभौपितदन्यदीपमालिकाहोलिकाप्रकरणेप्रमाणंभा
वात्तेषामावश्यकत्वे। स्पष्टं चेदं स्कंदपुराणनिर्णयसिंधुभगवानदासब्रह्मपुराणेषु॥ तथा
हि॥ तथाहि॥ चतुष्पथश्मशानेषु नदीपर्वतवेश्मसु॥ रथ्याप्रांगणगोष्ठेषु चत्वरेषु गृ
हेषु च॥ दीपमालाप्रकर्त्तव्या शक्त्या देवगृहेष्वपि॥ स्कंदपुराणे॥ उदसेविवयाचैवमि
त्यारभ्य अकरणे निंदाश्रवणादित्यंतेन स्पष्टमेवतत्करणत्वप्रतीतेः। तयोस्तेनहे
तुहेतुमद्भावाच्चेति॥ ॥ उक्तप्रकारकप्रश्नेः त्यंतभुजिष्यायाः पत्न्यावरजंगमा
त्मकं धनं ब्राह्मणेन दत्तं तत्तदभावे प्रदत्तब्राह्मणपुत्रस्यैव आस्वेवतु भुजिष्या
सुदोषस्यात्परदारवदितिमिताक्षराधृतनारदवचने। नतस्यांदारत्वातिदेशा

दिति॥ ०॥ पारसीक लिखित शास्त्रार्थसंमतिमाह॥ येषु तीर्थेषु ये देवा ये षु ती
र्थेषु ये द्विजाः॥ येषु तीर्थेषु यन्न्यायं विचिकित्सन्न तत्र तु॥ विवादचिंतामणौ बृह
स्पतिरपि। देशस्थित्या प्रदातव्यं गृहीतव्यं तथैव च॥ समवेतैस्तु यद्दत्तं प्रार्थनी
यं तथैव तदिति॥ ०॥ एवंभूते प्रश्ने व्यवहारमाप चे॥ नारदः॥ विद्यमानेपि लि
खिते विद्यमानेपि साक्षिषु॥ विशेषतस्स्थावरेषु यन्न भुक्तं न तत् स्थिरं॥ सामंतादि
अनुज्ञामंतरेण पृथ्वीस्वामिनो विक्रये अधिकारो नास्ति॥ ०॥ रामकृष्णस्याय प्र०॥
पारसीक लिखित शास्त्रार्थसंमतिमाह॥ परभूमौ गृहं कृत्वा स्तोमं दत्वा वसेत्तु यः॥
स तद्गृहीत्वा निर्गच्छेत् तृणकाष्ठेष्टकादिकं॥ स्तोमं विना वसित्वा तु परभूमावनि

दत्तःनिर्गच्छेत्स्वगणेकाष्ठानिनगच्छीयात्कथंचन॥ यत्तुंचेदनारदवचनंवीर
मित्रोदयव्यवहारमाधवविवादचिंतामणिमहानिबंधेषुसंमतोयंशास्त्रा
र्थःसर्वेषांपंडितानामचसंमतिः॥०॥ पारसीकलिखितशास्त्रार्थसंमतिंपु
कारमाह॥ पुत्रीकरणाधिकारेब्राह्मणमित्यादिप्रतिपादितेपुन्नामनरकात्त्राण
कत्वेनैवनिवेशाचास्यचविन्नोत्पन्नसवर्णेतनयारेषसंभवात्तस्य
प्रकृतविषयेअभावेनपुत्रीकरणसंभवः॥ यच्चोक्तंचेदमिताक्षरादि
महानिबंधे॥ सवर्णेभ्यःसवर्णासुजायंतेहिसजातयः॥ अनिंद्येषुविवा
हेषुपुत्राःसंतानवर्द्धनाः॥ विन्नास्वेषविधिःस्मृतइत्यादिनेति॥०॥१

वा

ए

१६

16

पूर्वोक्तप्रश्नोउत्तरं निरूप्यते॥ कायस्थव्यभिचारजस्य तज्जातौ प्रतिनिधिकर
णं शास्त्रसंमतं नेतिसंशयेनेत्येव निर्णयः स्पष्टीकृतं चैतन्मितलाक्षरात्व्यवहारम
यूखयोः॥ ब्राह्मणानां सपिंडेषु कर्तव्यः पुत्रसंग्रहः॥ तदभावे सपिंडो वा अन्य
त्र तु न कारयेत्॥ क्षत्रियाणां स्वजातौ वा गुरुगोत्रसमोपि वा॥ वैश्यानां वैश्यजाती
षु शूद्राणां शूद्रजातिषु॥ सर्वेषामेव वर्णानां जातिष्वेव न चान्यतः॥ सवर्णेभ्यः स्वव
र्णासु जायंते हि सजातयः॥ अनिंद्येषु विवाहेषु पुत्राः संतानवर्द्धना इति॥ यद्यप्य
पध्वंसजस्य शूद्रजातीयत्वात्तृकृतविशेषेतत्संभवस्तथापि कायस्थत्वव्याप्य
शूद्रत्वस्याभावान्न तत्संभवः॥ अन्यथा गोपाद्युत्पादितस्यापि कायस्थादौ दत्त

कार्यापत्ते रिति॥ श्रीशिवस्य स्वस्थापितस्यानादुद्धृत्यान्यत्र कोप्याव धिद्रव्य
व्ययेनापि स्थापनेन भवति यदि तस्यं शिवलिंगं दग्धं खंडितं स्फुटितं दुर्वृत्तै र
पहृतं वा भवेदापितस्मिन्नेव स्थले विधिनान्य लिंगं तन्नामकं स्थाप्यं नान्य
त्र स्पष्टं चैतदग्निपुराणे शिवपुराणे सिद्धांतशेखर प्रतिष्ठामयूखेषु॥ सुस्थि
तं दुःस्थितं वापि शिवलिंगं न चालयेत्॥ जीर्णं वाप्यथवा भग्नं विधिनापि न
चालयेत्॥ यद्द्रव्यं यत्प्रमाणं च लिंगं वा प्रतिमापि वा॥ तादृक्तेनैव मानेन
तद्द्रव्येन प्रकल्पयेत्॥ कारयेन्नान्यमानेन नान्यद्रव्येण तत्पुनः नान्याकारं च
नान्यत्र स्थापयेत्तदुद्धृतम् इति॥ ०॥ त्रिषु सोदरेष्वविभक्तेषु अपि क्रीत

17

दत्तयोर्भ्रातृपुत्रस्यैकस्य पौत्रपत्न्याः स्वस्वपतिस्वश्वशुरदत्तककर्तुर्यद्भुक्तं
स्थावरादिधनं दत्तककर्तुर्भ्रातृद्वयोत्तराधिकारिभिरनुपभुक्तं स्थावरादि
धनं तेषु सत्स्वपि स्वदौहित्रयोत्तराधिकारित्वेन दत्तं सिध्यस्येव ॥ स्वतंत्रस्वा
मिकृतत्वात् ॥ अन्यायेनापि यद्भुक्तं पित्रा पूर्वतरैस्त्रिभिः ॥ न तच्छक्यमपा
हर्तुं क्रमात्त्रिपुरुषागतं ॥ पश्यन्नयस्य ददतः क्षितिं यो न निवारयेत् ॥ स्वा
मिस्तापि लेखेन पुनस्तामवाप्नुयात् इति नारदबृहस्पतिवचनाभ्यां
स्वतंत्रस्वामिकृतस्य सिद्धत्वप्रतिपादनादिति श्रीधरणीधरस्येदं ॥
एवं विधे प्रश्नस्वरूपे स्थावरविषये स्थावरस्य समस्तस्य गोत्रसाधारणस्य च

नैकः कुर्यात्क्रयं दानं परस्परमतं विना ॥ अविभक्ता विभक्ता वा सपिण्डाः स्थावरे समाः ॥ एको ह्यनीशः सर्वत्र दानाधमनविक्रये ॥ मृते भर्तरि भर्तृशेष भेत कुलपालिका ॥ यावज्जीवं न हि स्वाम्यं दानाधमनविक्रये ॥ इत्यादि वचनैर्यद्यप्यविभक्तस्थावर विषयं दानं विद्यमानेषु दायादेषु विशेषतस्त्री कर्तृकं न सिध्यति तथाप्याहता चिपुरुषी भुक्तिरभ्यो गरीयसी त्यादि वचनात्स त्स्वपि दायादेषु सर्वथा स्त्रिया एव त्रैपुरुषिक भोग सत्वाद्विशेषकः ॥ कन्या पुत्रो द्देश्यक दान विषयत्वाद्दायादैर्विभक्ता विभक्तसंदेहे पि स्व भागान्यदि दद्यु स्तद् इति नारदोक्तरीत्या स्वान्स दानं स्त्रिया अपि निर्विवादमेवेति पण्डितरामदत्तसंमतमिति दिक् ॥ ० ॥ अनागमं तु यो भुंक्ते बहून्यब्दशतान्यपि ॥ चौरदंडे

१८

स्य

18

नतेपापंदंडयेदवनीपतिः॥इतियाज्ञवल्क्यवचनं॥अविभक्ताविभक्ता
वासपिंडास्थावरेसमाः॥एकोह्यनीषसर्वत्रदानाधमनविक्रये॥इति
व्यासवचं।स्वभागान्यदिदद्युस्तेविक्रीणीयुरथापिवा।कुर्युर्यथेष्टंतस्स
र्वमीशास्तेस्वधनस्यवै॥इतिनारदवचनेदहस्यतिश्च॥भुक्तिस्त्रिपु
रुषीसिध्येदपरेषांनसंशयः॥अनिष्कलेसपिंडेत्वेसकुल्यानांनसिध्य
ति।अस्वामिनालुपद्धतेगृहक्षेत्रापणादिकं॥सुहृद्बंधुसकुल्यानांनद्भो
गेनहीयते॥विवाह्यश्रोत्रियैर्भुक्तं राज्ञामात्यैस्तथैव च॥सुदीर्घेणा
पिकालेननतेषांसिध्यतितंतुनेत्यादिवचनैः॥०॥मनुरपिवचनं॥॥
त

भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन्मृतेऽपि तत्॥ सा यथाकाममश्नीयात् दद्याद्वा स्थावरादृते॥ तथा च बृहस्पतिः॥ अस्वामि विक्रियं दानमाधीं च विनिवर्तयेदिति॥ अत्रेयं व्यवस्था॥ दायादैरविभक्तधनस्य प्रमितस्य पत्युस्तद्विभक्तधने पत्न्या अधिकारित्वाभावेन तदविभक्तदायादानुमतिं विना तद्यावत्तेन तद्दानं न सिध्यति॥ पत्न्यधिकारप्रतिपादकानां पत्नी दुहितरश्चेत्यादिवचनानां विभक्तपतिधनविषयत्वात्॥ अस्वामी विक्रियं दानमाधीं च विनिवर्तयेत्॥ अस्वामिनाकृतोयस्तु दायो विक्रय एव वा॥ अकृतस्य तु विज्ञेयो व्यवहारे यथास्थितिरित्यादि विवादचिंतामणिस्थवचनाच्च॥

वा

नुक्तिस्त्रिपुरुषीसिध्यदित्यादिवचनेनत्रैपुरुषिकभोगेनसपिण्डानांसत्व
हानेरभौच्चेतिसंख्यावर्ततांनिर्णयः॥पूर्वोक्तानेकवचनेप्रश्ने तदुत्तरं॥गुरुर्या
वज्जीवतितावत्स्वकार्यंकरोति।तदभावेचतत्स्थानापन्नस्तद्धर्मेलभत
इतिन्यायेनव्रीहिस्थानापन्ननीवारेषुतद्धर्मप्रोक्षणादिसंपादकेननाश
कोधननिर्देदानुमितिनिषधाविषयत्वेनस्वातंत्र्येणचसच्छिष्यस्तद्वदेवतत्का
र्यंकरोतिव्यक्तीकृतंचैतन्मिताक्षरायां॥गोस्वामिस्थानस्यमठछात्रादिनिर
पदइत्यादिकाशान्मठत्वेननिर्णयः।तत्स्थानस्थितस्यतादृशशिष्यस्यस्थावरादेस्स्वा
मित्वादीशास्त्रस्वधनस्यवाइत्यादि।दायभागोक्तनारदवचनाच्चभवत्येवाधि
कारः॥नादृशस्यशिष्यस्यसन्निधानेसच्छिष्याणामधिकारः॥स्पष्टीकृतंचैत

वैतन्मिताक्षरादिमहानिबंधेषु संमतोपमर्थः ॥ ० ॥ पूर्वोक्तप्रश्ने तदुत्तरं लि
ख्यते। पतिपुत्ररहितया कन्यावित् स्त्रियास्वपतिसंनिहितसपिण्डसत्वे तद
नुमतिं विना यत्सौदायिकातिरिक्तं स्वपितृकुलेभ्यो दत्तं तदनुचितं ॥ अपुत्रा
शयनं भर्तुः पालयंती व्रते स्थिता। भुंजीतामरणात् क्षांता दायादा ऊर्ध्वमाप्नुयु
रिति कात्यायनवचनेन तस्याः संनिषेधात् ॥ तत्प्रतिप्रसवकस्तेपि भर्तुः औ
र्ध्वदेहिकक्रियार्थं अर्थानुरूपं भर्तुः पितृव्यादिभ्यो देयात् दद्यात् ॥ तदाहना
रदः ॥ मृते भर्तर्यपुत्रायाः पतिपक्षः प्रभुः स्त्रियाः ॥ विनियोगार्थरक्षासु भ
रणेषु स ईश्वरः ॥ परिक्षीणे पितृकुले निर्मनुष्ये निराश्रये ॥ भर्तृपक्षेषु चासत्सु
पितृपक्षः प्रभुः स्त्रियाः ॥ इत्यादि दायविभागे गोसंदर्भपर्यालोचनया दाना

पति

स्युपगमपक्षेपि तदनुमतिं विना तन्निषेधाच्चेति ॥ ० ॥ उक्तप्रकारकप्रश्नेपि तत्पर्यंतरहितस्योपरतस्य स्थावरादिधने स्नुषासत्वेपि वैमात्रेय भ्रातुरधिकारः ॥ किंतु स्नुषा अन्नाच्छादनं ततो लभेत् ॥ यद्यसौ भ्राता धनिनः पित्रोढायाः पुत्रो न भवति तदा स्नुषाया एव तद्धनेधिकारः ॥ भ्रातरस्तथैति याज्ञवल्क्योक्तेः ॥ पौनर्भव स्तथेत्यादिना तस्य धनाधिकारनिषेधात् ॥ ० ॥ ९ ॥॥

उक्तप्रकारकप्रश्ने शूद्रेणोढायामुत्पादितस्य प्रमीतस्य स्थावरादि धने न तत्पौनर्भव भ्रातुः स्वजातौ व्यवहार्यत्वेपि समाचारेण सर्वजातीनां धनाधिकारानधिकारप्रत्यायकमनुवचनाभ्यां नाधिकारः ॥ स्नुषाया एव सर्वधनाधिकारः ॥ ७

तथाचमनुः। पौनर्भवश्च शौद्रश्च षड्दायादबांधवाः इति। अनंतरः सपि

ण्डाद्यस्तस्य इत्यादि च॥०॥पारसीकत्तिरिव तत्ता स्नार्थप्रमाणानुपाठशालातः

प्रेषितपूर्वपत्रे यद्यपिस्वपितृस पिण्डसमानोदकानां सन्निहितरिक्थ

तराभावे पूर्वषट्कस्य तद्रिक्थहरत्वमुत्तरषट्कस्य तु तन्नास्ति बांधव

त्वे तु पुनः समानगोत्रत्वेन सपिण्डत्वेन चोदकप्रदानादिकार्यकरत्वे

ऽप्युभयस्यापि समत्वमेवेति व्याख्येयमित्यं तेन मिताक्षरायां व्यक्तमिति

तत्तएवावधार्यमिति॥०॥यदपिमनुनापुत्राणां षट्कद्वयमुपन्यस्य पूर्वष

ट्कस्य दायादबांधवत्वमुत्तरषट्कस्यादायादबांधवत्वमुक्तं औरसक्षेत्रज

21

२१

५

श्चैवदत्तकृत्रिमएवच॥गूढोत्पन्नोपविद्धश्च दायादाबांधवाश्चषट्॥ कानीनश्चसहोढश्चक्रतःपौनर्भवस्तथा॥स्वयंदत्तश्चशौद्रश्चषडदायादबांधवाइति॥०॥पारसिकोस्वस्थितशास्त्रार्थंप्रमाणमाह॥आधातापत्रवेनस्याधनीवधंनिवेदयत्॥राज्ञस्ततःसविज्ञातोविक्रेयइतिधारणा॥सर्वक्षिकंगृहीत्वानुधोपंराजन्यथार्पयेत्इतिसंमतोयमर्थः॥०॥ विषयविषद्रोदंडभावमाह॥चतुष्पादकृतोदोषोनापैहीतिप्रजल्पतः॥ चतुष्पादैर्गजगजादिभिः॥कृतोदोषोमनुष्यमारणादिरूपोअसौगवादिस्वामिनोनभवति॥अपसर्पेतिप्रकर्षेणउच्चैर्भाषमाणस्येति॥ २ ॥

प

कश्चिदपुत्रः सपिण्डो विभक्त एव निधनं गतस्तदा तदीयधनभाजः सपि
ण्डः पत्नी तु ग्रासाच्छादनं लभते यदि च सपिण्डैर्विभक्त एव स्वर्यातस्त
दा तु पत्नी तदीयं कृत्स्नं धनं लभते स्पष्टं तन्मिताक्षरायां पत्नी दुहितर
श्चेत्यादिना ॥ ० ॥ पूर्वोक्तप्रश्नस्योत्तरं तु ॥ पत्नी दुहितरश्चेत्यादिना
मिताक्षराया व्याख्यातमिति तत एवावधार्यमिति ॥ ० ॥ प २ ॥
पूर्वोक्तप्रश्नं विचार्य तदुत्तरं लिख्यते ॥ मातामह मातुल तदीयपत्नीनां म
ध्ये पूर्वं मातामहनिधने पश्चान्मातुलनिधने वशिष्टयोस्तदीयभार्ययोर्म
ध्ये तदीयधनाधिकारिणी केति प्रश्ने मातुलपत्न्येवेति निर्णयः पत्नी दु

दुहितरश्चेतिस्मरणात्। मातामहपत्नीतुग्रासाच्छादनमात्रंलभतइति॥०॥९
पूर्वोक्तप्रश्नेलदुत्तरं लिख्यते॥मातामहपुत्रेमातुलेसतिमातामहेपूर्वंमृतेमातु
लस्यैवसर्वधनाधिकारः॥तस्यमरणेतत्पुत्रस्तत्सल्याएवरचत्वेनदौहित्रस्यप
त्नीदुहितरइत्यादिवचनात्व्यक्तीकृतंचैतत्पूर्वमपीति॥०॥सुधर्मासिद्दशासुवे
र्णकोटाख्यन्यायशालातोमहीमहीदूरचितकाशिस्थपाठशालानिवेशितपंडि
तानांसविधेप्रश्नाआगताःतानालोच्यतत्रस्थैपंडितैर्यथाशास्त्रमुत्तराणिलित
नि॥तत्रप्रमाणानि॥पद्मपुराणेस्कंदपुराणेच॥आदित्यंगणनाथंचदेवींरुद्रंय
थाक्रमं॥नारायणंविशुद्धाख्यंमंतेचकुलदेवताः॥पूजयेदितिशेषः॥ब्रह्मवैव
र्तप्रकृतखंडे।गंगातोयमुपस्पृश्यमिध्यायद्विदेजनः॥सयातिकालमृत्युंचयो

वद्देब्रह्मणेवयः॥ करोतिमिथ्याशपथंतुलस्यायोहिमानवः॥सयातिवैकुंभीपाकेच
यावदिंद्राश्चतुर्दश॥मिताक्षरायां॥देवतापितृपादांश्चदत्तानिसुकृतानिच॥स्पृ
शेच्छिरांसिपुत्राणांदाराणांसुहृदांस्तथा॥ वीरमित्रोदये॥एभिरेवनियुंनां साधू
नांदिव्यमर्हति॥कालिकापुराणे॥लिंगस्यांपूजयेद्देवींपावकेप्रतिमासुच॥श्यामा
रहस्येपुरश्चरणप्रकरणेविधानगमयेत्कालं द्यूतक्रीडादिनासुधीः॥गमयेद्देवता
पूजाजपयागस्तवादिना॥रूद्यावाप्यतरंकुर्याद्विलरोवर्तयेच्छिरइतियाज्ञवल्क्यवच
नेनार्थिप्रत्यर्थिनोरप्यन्तरस्यैव शापथउक्तः॥शुद्धिविवेकेमरीचिः॥यस्मिन्देशेचयच्छौ
चंधर्माचारस्तथादृशः॥तत्रतन्नावमन्येत धर्मस्तत्रैवतादृशः॥•॥उक्तप्रकारकप्रश्ने॥
गुलाबरामस्यौर्द्धदेहिकादिकर्मणिमातृसपिंडतयावैद्यनाथस्यैवाधिकारोनतुवीरेश्व
श्वरपुत्रस्यपुत्राभावेसपिण्डमातृसपिंडयोः॥ग्रियाश्चदद्युरित्यौर्द्धदेहिकप्रकरणेमिता

का

२३

मिताक्षराधृतगौतमवचनात्॥ तथा मातीरामेयन्मुद्राशतद्वयं गुलाबरामायदातुंप्रति
श्रुतंतत्रापितदौर्द्दैहिकादिकर्मकर्तुर्वैय्यनाभस्यैवाधिकारोनतुगुलाबरामेणप्रीतिप्रति
श्रुतद्रव्ययाचिणोः॥ एवमेवगुलाबरामेणयन्मुद्राशतपंचकंमातीरामायदातुंप्रतिश्रुतं
तत्रतच्छ्राद्धकर्तुर्वैरिश्वरस्यैवाधिकारः असत्वात्प्रतकार्याणीत्यादिकात्यायनोक्तेरि
तिपरामर्शः॥ ०॥ पारसीकलिखितशास्त्रार्थसंमतिरुच्यते ब्राह्मणस्त्रीणांसहगमनं
नानुगमनं॥ अन्यासांतूभयं॥ तथाचनिर्णयसिंधौमनुः॥ ब्रह्मचर्यंचरेद्वापिप्रविशे
द्वाहुताशनं॥ नम्रयेत्यादिनिषेधवाक्यानितुपृथक्चितिपराणि॥ पृथक्चितिंसमास
मारुह्यनविमार्गंतुमर्हति॥ अन्यासांचैवनारीणांस्त्रीधर्मोयंपरस्मृतः॥ इत्युशनसोक्तेः॥
व्यक्तीकृतंचैतन्निर्णयसिंधौ॥ अस्थिदाहपलाशदाहवानपृथक्चितिदोषः॥ अंगाले
नस्यानापलावाशरीरंतुस्पर्शवादित्यादिना॥ संमतोयमर्थः॥ ०॥ उक्तप्रकारकप्रश्नेतदु

तरलिख्यते। स्वधनार्जितस्थावराया: स्ववस्तुजातस्वतंत्राया: पतिपुत्रादिविहृताया:
स्त्रीया अपि स्त्रीधनातिरिक्तधनदाने यावज्जीवं भर्त्रादिकुलपारतंत्र्यं। तथाच दाय
भागे कात्यायनः। अपुत्रा शयनं भर्तुः पालयंती गुरौ स्थिता। भुंजीतामरणात्क्षांता
दायादा ऊर्ध्वमाप्नुयुरिति। यदि च दैववशात्तदनुमत्यापि पत्युपकारार्थं ब्राह्मणाय
विष्णुप्रीत्यर्थं दत्तवती तदा तद्दानं सिध्यत्येव इष्टप्रवापस्तु भवत्येव। स्पष्टीकृतं
चैतद्वैडरहस्यशिरोमणिना दाक्षिणात्य मिताक्षरादिग्रन्थद्वयपर्यालोचनेन तु ईदृशा
विषये तु तस्यास्वातंत्र्यं॥ तद्दानपरावृत्यभावश्च सिद्धः॥ स्पष्टीकृतं चैतन्मिताक्ष
रायां दत्वा नापहरेत्पुनरित्यादिनेति परामर्शः॥०॥ अथ मृते भर्तरि चतुर्वर्णस्त्री
णां ब्रह्मचर्यं सहगमनं चोक्तं॥ तदाह विष्णुः॥ मृते भर्तरि ब्रह्मचर्यं तदन्वारोहणं वेति। २४
सहगमने फलाधिक्यमाह हारीतः॥ यावच्चाग्नौ मृते पत्यौ स्त्री चात्मानं न दाहयेत्॥

24

तावन्नमुच्यते साहि स्त्री शरीरात्कथंचनेत्यादिना ॥ अयं चाऽस्त्रीणां सरजस्कानाम
गर्भिणीनामबालापत्यानामाचांडालं व्यभिचारिणीव्यतिरिक्तः साधारणो धर्मः ॥
तथा च वृहन्नारदीये ॥ रजस्वलाप्रियेसाध्वि माकुरुष्वातिसाहसं ॥ तवोदरेचत्रवर्ति
शत्रुर्हंता च तिष्ठति ॥ बालापत्याश्च गर्भिण्यो ह्यदृष्टरजसस्तथा ॥ रजस्वला राजसुते
नारोहंति चितां शुभे इति ॥ स्वैरिणीनां गर्भीणीनां पतितानां च योषितामित्यादिना
स्मृतिसंग्रहोक्तेः ब्राह्मणीव्यतिरिक्तानां सर्वासां सहगमनमनुगमनं मपि चेति ब्राह्मण
स्तु नानुगमनं किंतु पृथक् चितिनिषेधात्सहगमनमेव ॥ पृथक् चितिं समारुह्य
नविप्रा गंतुमर्हतीतीति भरद्वाजवचनात् ॥ एकस्मिन्नेवत्रवदाहे जातेसति पृ
थक्चितिरित्युच्यते ॥ तेनाप्येवत्रवदाहे जाते स्वपत्नीपणि शिरएवादाहकाले ब्राह्म

एषाश्च नैषनिषेधः॥ अंगत्वेनस्थानापत्याबाशारीरतुल्यत्वादित्युक्तो निर्णयसिंधौ॥
विप्राग्रहाणाद्न्यासांमंत्रवदाहेय्यनुज्ञागम्यतेतिनिष्कर्षः॥ ० ॥पादार्घगुरुद
क्षिणाशब्दाभ्यांकिमभीधीयतेतच्छब्दश्रीरितंसनदशब्देनख्यातंपत्रंप्रमाणत्वे
नसर्वदानवर्त्ततेनवेतिचेत्तस्यापशालाप्रभुक्तैनिर्णयः॥ अर्हणार्हचरणा
र्पणार्हद्रव्यंपादार्घशब्देनाभिधीयतेगुरुदक्षिणाशब्देनतुवेदाध्यापनमंत्रोपदे
शादिनोक्तोपकारस्यगुरोर्स्तुपकाररूपेसमर्पणार्हंवस्तुचोच्यते॥ तयोरन्यतरे
णतावाघटितमागमात्मकंपत्रंप्रमाणतयासर्वदानवर्ततेएवपादार्घगुरुद
क्षिणारूपस्यद्रव्यस्यदत्तस्यविहितमार्गाश्रयत्वेनदत्तातगतित्वात् तथाचदत्वा
नापहरेत्पुनरितियाज्ञवल्क्यवचनेव्याख्यानावसरेसमाहमिताक्षराकारःन्याय
मार्गेणयद्दत्तंतत्सप्तविधमपिपुनर्नापहर्तव्यंतथेवानुमंतव्यंसप्तविधदत्तस्वरू

पमुक्तं नारदेन। पण्यमूल्यं भृतिस्तुष्ट्या स्नेहात्प्रत्युपकारतः स्त्रीशुल्कानुग्रहार्थं च दत्तं
दानविदो विदुरिति प्रत्युपकारतः उपकृतवते प्रत्युपकाररूपेण अनुग्रहार्थमदृष्टार्थं
दत्तं तदेतत्सप्तविधं दत्तमेव न प्रत्याहरणीयं तत्प्रत्याहरंस्तु दण्डवता नारदेनोक्ता अदे
यदायकोदंडस्तथादत्तप्रतीच्छक इति तथा वीरमित्रोदये। उपकारार्थं दत्तं सफलं न भव
तीति दर्शयितुं नारदोऽह मातापित्रोर्गुरौ मित्रे विनीते चोपकारिणि दीनानाथविशिष्टेभ्यो दत्तं
तु सफलं भवेदिति यः पुनः प्रतिश्रुतं न ददाति दत्तं वापहरति तस्य दोषमाह हारीतः प्र
तिश्रुतार्थादानेन दत्तस्य छेदनेन च विविधान्नरकान्याति तिर्यग्योनौ च जायते इति त
स्माद्याज्ञवल्क्यादिस्मृतिमिताक्षरादिनिबंधपर्यालोचनया विहितमार्गेण दत्तस्य
पुनरादानाभावसिध्यात्तत्रस्य सर्वदानुवर्तिरेवास्माकं प्रतिभातीति संक्षेपः।।०

संतोषरामाभिधस्य कस्यचिच्चत्वारः पुत्रा आसंस्तेषु द्वाभ्यां मनसाराम मयारामाभ्यां भ
गवलरायवाँकडासंज्ञ धनिकाद्दणदायविश्वासायतत्स्वविधेजनकार्जितं स्वमग्रंग
हमाधीकृतं तद्बंधकीकरणाने लरंगहार्द्धभागभाजो सीतारामे छब्बारामाभिधेभ्योद्वा
वन्यात तत्पुत्रौ कालाधीनौ संवृत्तौ ततः सीतारामात्मजः परमानंदाभिधः स्वतातभाग
भागजितं छब्बारामस्य चात्मजास्वजनकभागे प्रतिष्ठिता बभूव संप्रति तु सीतारामसु
तपरमानंदभागनेयोस्तिसचे छब्बाराम सुलाया औद्धदेहिके कृतवान्ततः सीतारामे
छब्बारामयोर्भागं गृहार्द्धं सीतारामदौहित्रस्य स्वस्यातं किंवा मेयाराम मनसारामोपरि
संसाधितं तएस्यो क्ताथिनो लब्ध विजयपत्रसि खिलरूप्यमुद्राप्रदानाय तद्गृहं सम
ग्रं विक्रयणार्हमिति पाठशालास्थ पंडितान्प्रति न्यायशालाप्रभुं कृतेप्रश्ने तत्कृतो नि
र्णयः ॥ सीतारामस्य दौहित्रः स्वमातामहांशग्रहणयोग्यस्तथैव छब्बारामदुहितुरप्यन्यसं ॥ २६

26

रा भागिनो भावादेतस्य च तद्दौहित्र दैहिक कर्मकारित्वात्संबंधित्वाद्दायमेवांशाहर
णार्हः यथाह विष्णुः ॥ अपुत्रपौत्रसंताने दौहित्रा धनमाप्नुयुः पूर्वेषां तु स्वधा
कार पौत्रदौहित्रकामता । इति मनुरपि । अकृता वा कृता वापि यं विं
देत्सदृशात्सुतं पौत्री मातामहस्तेन दद्यात्पिंडं हरेद्धनमिति । तथा दा
यभागे पितुरपि पौत्रपर्यंताभावे पितुर्दौहित्रस्याप्यधिकारो बोधव्यः ।
धनिकदौहित्रस्यैवेत्युक्तं तथा वीरमित्रोदये योगीश्वरवचने बंधु
पदेन मातुलाद्युपलक्षणमित्युक्तत्वात् तथा दायभागे मनुवचन
गतस्य कल्यपदव्याख्यावसरे सकुल्यो व्यक्त प्रपितामहादिसंततिरि
त्युक्तत्वाच्च भागिनेयादीनामपि संग्रहः तस्मान्मिताक्षरादिग्रंथ न द्यादिव
वि

चनैस्तत्वतत्वावस्थयाच सीतारामदौहित्रः सीतारामपुत्रस्य इच्छाराम
स्याप्याश्चाभवितद्भागभागभवितुमर्हति त्यस्माकं प्रतिभाति ॥ ० ॥ ७
धर्मप्रदीपे । सुलक्ष्यवयसाधिक्यमातायदिकनीयसी । पितृपिंडप्रदानार्थंश
त्यार्थेधारयेच्चतं ॥ संग्रहीतपुत्रस्यसतिसहजतनये अन्येषामनधिका
रः । सर्वशास्त्रसंमतः बहुलेख्येननालं ॥ सिंहवाजपेयेव्यवहारखंडे ॥
पितृभ्रातृसुतेयान्यंपुत्रत्वेनापिवांछति ॥ कुलक्षीपोराहुतामोहात्पूर्वंपौ
रोरवायसा ॥ मातुरपेक्षयासंग्रहीतपुत्रस्यज्येष्ठकनिष्ठकत्वकल्प
नासंभवेपितृपुत्रभ्रातृपुत्राणामुपरिनसापिस्यात्परतःकल्पनीये ।
तच्च धर्मप्रदीपेव्यवहारेणविज्ञ । मातावेद्वयसानुनापुत्रश्चेद्वयसाधिकः ॥

27

यस्जितस्वगोत्रेवागर्ह्ये यात्तस्तं देवहि ॥ व्यवहारादर्शेपि ॥ राज्यार्थे
व्यवहारार्थे लोकयात्रार्थमेव च। आमुष्मिकी क्रियार्थे च मुख्यार्थे भवसाग
रात् ॥ वयसाप्यधिकं पुत्रं सुदनं स्वकुलोद्भवं ॥ धीमन्तं निपुणं बुद्धिमं
तं यशस्विनं। स्वगोत्ररक्षके चैव प्रजारक्षणतत्परं ॥ स्वधर्मनिरतं नित्यं
पितृपिण्डप्रदं तथा ॥ एभिर्गुणैः समायुक्तं सपिण्डं वयसाधिके ॥ स्वगो
त्रे वा स्वकुलं जं मत्ते भर्त्तारं ग्राहयेदिति ॥ जयपुरस्य धर्माधिकारी वि
दुषो परामर्षः ॥ ० ॥ कस्यचिद् पुत्रस्य स्वर्यातस्य द्वे पत्न्यावविभक्तधने
अभूतां तयोर्मध्ये एका कन्यायुता एका च निरपत्या उत्तरसमभिधीपते।
पालिमर लोत्तरं तद्धनं उभयोपत्न्यो समं संतं तत् एकस्या मृता एकस्या स ८२

पि २

त्वंनिर्वापिमेवेति।किंचपतिमैत्रोक्तंपत्न्याएवसत्वंनदौहित्रादेः।तथाचया

ज्ञवल्क्यः।पत्नीदुहितरश्चैवपितरौभ्रातरस्तथेति।वृद्धमनुरपि॥

अपुत्राशयनंभर्तुःपालयन्तीव्रतेस्थिता।पत्न्येवदद्यात्तत्पिण्डंकृत्स्न

मंशंलभेतचेति।वृद्धविष्णुरपि॥अपुत्रधनंपत्न्यभिगामीतदभावे

दुहितृगामीति।कात्यायनोपि॥पत्नीभर्तुर्धनहारीयास्यादव्यभि

चारिणी॥तदभावेतुदुहितायद्यनूढाभवेदेतेति।वृद्धबृहस्प

तिरपि॥कुल्येषुविद्यमानेषुपितृभ्रातृसनाभिषु॥असुतस्यप्रमी

तस्यपत्नीतद्भागहारिणीतिवचनैःपत्न्याएवाधिकारः॥पण्डितर

त्नजीशर्मपरामर्शः॥

28 धु २८

उक्तप्रकारकप्रश्नेउत्तरं लिख्यते॥ सौदायिकेस्त्रीणांस्वातं
त्र्यंपरिकीर्तितं॥ विक्रयेचैवदानेच यथेष्टंस्थावरेष्वपीत्येवमादि
वचनैःस्वपतिभ्रातृपुत्रसत्वेपिस्त्रीणांस्थावरादिदानेधिकारोस्त्येव
यद्यपिस्थावरदत्तइत्युक्तेः॥ स्त्रीणांस्थावरादिदानेनाधिकारस्त
थापिसौदायिकरूपस्थावरेस्त्येवाधिकारइतिपाठशालास्थप्रधा
नमंडितकृतसिद्धांतः॥ उक्तप्रकारकप्रश्नेस्थावरजंगमात्मकंयद्धनं
तत्कृतब्राह्मणस्येवनतुराज्ञः॥ स्वैरिण्यब्राह्मणीवेश्यादासीनिष्कासी

प. २९ नं. ४४०६

नीलथा। गम्यांस्य रानुलोम्येन स्त्रियो न प्रतिज्ञो मतः॥ आस्वेवलु भु

जिष्यासु दोषस्या परदारवत्॥ इति मिताक्षराध्रतनारदवचनेन॥

भुजिष्यायां दारत्वादेवादिति॥

मनुः॥ योगाधमनविक्रीतं योगदानप्रतिग्रहं।

यत्र वाप्युपधिं पश्येत्तत्सर्वं विनिवर्तयेत्॥

योगशब्दः छलवाची तेन यत्क्रीतं दत्तं प्रतिगृ

हीतं निक्षिप्तं तत्सर्वं विनिवर्तयेत॥२॥

१९५